# Natya Shastra Chapter 21

# નાટ્યશાસ્ત્રમ્ અધ્યાયઃ ૨૧

## Document Information

Text title : naaTyashaastra adhyaaya 21

File name : natya21.itx

Category : nATyashAstra, major_works, bharata

Location : doc_z_misc_major_works

Author : Sage Bharata

Transliterated by : dpadmakar at hotmail.com

Proofread by : dpadmakar at hotmail.com

Latest update : October 6, 2001

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# નાટ્યશાસ્ત્રમ્ અધ્યાયઃ ૨૧

॥ શ્રીરસ્તુ ॥

ભરતમુનિપ્રણીતં નાટ્યશાસ્ત્રમ્

અથ એકવિંશોઽધ્યાયઃ ।

આહાર્યાભિનયં વિપ્રા વ્યાખ્યાસ્યામ્યનુપૂર્વશઃ ।
યસ્માત્ પ્રયોગઃ સર્વોઽયમાહાર્યાભિનયે સ્થિતઃ ॥ ૧॥

નાનાવસ્થા પ્રકૃતય પૂર્વં નૈપથ્યસાધિતાઃ ।
અઙ્ગાદિભિરભિવ્યક્તિમુપગચ્છન્ત્યયત્નતઃ ॥ ૨॥

આહાર્યાભિનયો નામ જ્ઞેયો નેપથ્યજો વિધિઃ ।
તત્ર કાર્યઃ પ્રયત્નસ્તુ નાટ્યસ્ય શુભમિચ્છતા ॥ ૩॥

[તસ્મિન્યત્નસ્તુ કર્તવ્યો નૈપથ્યે સિદ્ધિમિચ્છતા ।
નાટ્યસ્યેહ ત્વલઙ્કારો નૈપથ્યં યત્પ્રકીર્તિતમ્ ॥] ॥ ૪॥

ચતુર્વિધં તુ નેપથ્યં પુસ્તોઽલઙ્કાર એવ ચ ।
તથાઙ્ગરચના ચૈવ જ્ઞેયં સજ્જીવમેવ ચ ॥ ૫॥

પુસ્તસ્તુ ત્રિવિધો જ્ઞેયો નાનારૂપપ્રમાણતઃ ।
સન્ધિમો વ્યાજિમશ્ચૈવ વેષ્ટિમશ્ચ પ્રકીર્તિતઃ ॥ ૬॥

કિલિઞ્જચર્મવસ્ત્રાદ્યૈર્યદ્રૂપં ક્રિયતે બુધૈઃ ।
સન્ધિમો નામ વિજ્ઞેયઃ પુસ્તો નાટકસંસ્રયઃ ॥ ૭॥

વ્યાજિમો નામ વિજ્ઞેઅયો યન્ત્રેણ ક્રિયતે તુ યઃ ।
વેષ્ટ્યતે ચૈવ યદ્રુપં વેષ્ટિમઃ સ તુ સંજ્ઞિતઃ ॥ ૮॥

શૈલયાનવિમાનાનિ ચર્મવર્મધ્વજા નગાઃ ।
યે ક્રિયન્તે હિ નાટ્યે તુ સ પુસ્ત ઇતિ સંજ્ઞિતઃ ॥ ૯॥

અલઙ્કારસ્તુ વિજ્ઞેયો માલ્યાભરણવાસસામ્ ।

નાનાવિધઃ સમાયોગોઽપ્યઙ્ગોપાઙ્ગવિધિઃ સ્મૃતઃ ॥ ૧૦॥

વેષ્ટિમં વિતતં ચૈવ સંઘાત્યં ગ્રન્થિમં તથા ।
પ્રાલમ્બિતં તથા ચૈવ માલ્યં પઞ્ચવિધં સ્મૃતમ્ ॥૧૧॥

ચતુર્વિધં તુ વિજ્ઞેયં નાટ્યે હ્યાભરણં બુધૈઃ ।
આવેધ્યં બન્ધનીયં ચ ક્ષેપ્યમારોપ્યમેવ ચ ॥ ૧૨॥

આવેધ્યં કુણ્ડલાદીહ યત્સ્યાચ્છ્રવણભૂષણમ્ ।
આરોપ્યં હેમસૂત્રાદિ હારાશ્ચ વિવિધાશ્રયાઃ ॥ ૧૩॥

શ્રોણીસૂત્રાઙ્ગદે મુક્તાબન્ધનીયાનિ સર્વદા ।
પ્રક્ષેપ્ય નૂપુરં વિદ્યાદ્વસ્ત્રાભરણમેવ ચ ॥ ૧૪॥

ભૂષણાનાં વિકલ્પં હિ પુરુષસ્ત્રીસમાશ્રયમ્ ।
નાવિધં પ્રવક્ષ્યામિ દેશજાતિસમુદ્ભવમ્ ॥૧૫॥

ચૂડામણિઃ સમુકુટઃ શિરસો ભૂષણં સ્મૃતમ્ ।
કુણ્ડલં મોચકં કીલા કર્ણાભરણમિષ્યતે ॥ ૧૬॥

મુક્તાવલી હર્ષકં ચ સૂત્રકં કણ્ઠભૂષણમ્ ।
વેતિકાઙ્ગુલિમુદ્રા ચ સ્યાદઙ્ગુલિવિભૂષણમ્ ॥૧૭॥

હસ્તલી વલયં ચૈવ બાહુનાલીવિભૂષણમ્ ।
રુચકશ્ચૂલિકા કાર્યા મણિબન્ધવિભૂષણમ્ ॥ ૧૮॥

કેયૂરે અઙ્ગદે ચૈવ કૂર્પરોપરિભૂષણે ।
ત્રિસરશ્ચૈવ હારશ્ચ તથા વક્ષોવિભૂષણમ્ ॥ ૧૯॥

વ્યાલમ્બમૌક્તિકો હારો માલા ચૈવાઙ્ગભૂષણમ્ ।
તલકં સૂત્રકં ચૈવ ભવેત્કટિવિભૂષણમ્ ॥ ૨૦॥

અયં પુરુષનિર્યોગઃ કાર્યસ્ત્વાભરણાશ્રયઃ ।
દેવાનાં પાર્થિવાનાં ચ પુનર્વક્ષ્યામિ યોષિતામ્ ॥ ૨૧॥

શિખાપાશં શિખાવ્યાલં પિણ્ડીપત્રં તથૈવ ચ ।
ચૂડામણિર્મકરિકા મુક્તાજાલગવાક્ષિકમ્ ॥૨૨॥

શિરસો ભૂષણં ચૈવ વિચિત્રં શીર્ષજોલકમ્ ।
કણ્ડકં શિખિપત્રં ચ વેણીપુચ્છઃ સદોરકઃ ॥ ૨૩॥

લલાટતિલકં ચૈવ નાનાશિલ્પપ્રયોજિતમ્ ।
ભ્રૂગુચ્છોપરિગુચ્છશ્ચ કુસુમાનુકૃતિસ્તથા ॥ ૨૪॥

કર્ણિકા કર્ણવલયં તથા સ્યાત્પત્રકર્ણિકા ।
કુણ્ડલં કર્ણમુદ્રા ચ કર્ણોત્કીલકમેવ ચ ॥ ૨૫॥

નાનારત્નવિચિત્રાણિ દન્તપત્રાણિ ચૈવ હિ ।
કર્ણયોર્ભૂષણં હ્યેતત્કર્ણપૂરસ્તથૈવ ચ ॥ ૨૬॥

તિલકાઃ પત્રલેખાશ્ચ  ભવેદ્ગણ્ડવિભૂષણમ્  ।
ત્રિવણી ચૈવ વિજ્ઞેયં ભવેદ્વક્ષોવિભૂષણમ્ ॥ ૨૭॥

નેત્રયોરઞ્જનં જ્ઞેયમધરસ્ય ચ રઞ્જનમ્ ।
દન્તાનાં વિવિધો રાગશ્ચતુર્ણાં શુક્લતાપિ વા ॥ ૨૮॥

રાગાન્તરવિકલ્પોऽથ શોભનેનાધિકોજ્વલઃ ।
મુગ્ધાનાં સુન્દરીણાં ચ મુક્તાભાસિતશોભનાઃ ॥ ૨૯॥

સુરક્તા વાપિ દન્તા સ્યુઃ પદ્મપલ્લવરઞ્જનાઃ ।
અશ્મરાગોદ્યોતિતઃ સ્યાદધરઃ પલ્લવપ્રભઃ ॥ ૩૦॥

વિલાસશ્ચ ભવેત્તાસાં સવિભ્રાન્તનિરીક્ષિતમ્ ।
મુક્તાવલી વ્યાલપઙ્ક્તિર્મઞ્જરી રત્નમાલિકા ॥ ૩૧॥

રત્નાવલી સૂત્રકં ચ જ્ઞેયં કણ્ઠવિભૂષણમ્ ।
દ્વિસરસ્ત્રિસરશ્ચૈવ ચતુસ્સરકમેવ ચ ॥૩૨॥

તથા શૃઙ્ખલિકા ચૈવ ભવેત્કણ્ઠવિભૂષણમ્ ।
અઙ્ગદં વલયં ચૈવ બાહુમૂલવિભૂષણમ્ ॥ ૩૩॥

નાનાશિલ્પકૃતાશ્ચૈવ હારા વક્ષોવિભૂષણમ્ ।
મણિજાલાવનદ્ધં ચ ભવેત્ સ્તનવિભૂષણમ્ ॥ ૩૪॥

ખર્જૂરકં સોચ્છિતિકં બાહુનાલીવિભૂષણમ્ ।
કલાપી કટકં શઙ્ખો હસ્તપત્રં સપૂરકમ્ ॥ ૩૫॥

મુદ્રાઙ્ગુલીયકં ચૈવ હ્યઙ્ગુલીનાં વિભૂષણમ્ ।
મુક્તાજાલાઢ્યતલકં મેખલા કાઞ્ચિકાપિ વા ॥ ૩૬॥

રશના ચ કલાપશ્ચ ભવેચ્છ્રોણીવિભૂષણમ્ ।
એકયષ્ટિર્ભવેત્કાઞ્ચી મેખલા ત્વષ્ટયષ્ટિકા ॥ ૩૭॥

દ્વિરષ્ટયષ્ટિ રશના કલાપઃ પઞ્ચવિંશકઃ ।
દ્વાત્રિંશચ્ચ ચતુઃષષ્ટિઃ શતમષ્ટોત્તરં તથા ॥ ૩૮॥

મુક્તાહારા ભવન્ત્યેતે દેવપાર્થિવયોષિતામ્ ।
નૂપુરઃ કિઙ્કિણીકાશ્ચ ઘણ્ટિકા રત્નજાલકમ્ ॥ ૩૯॥

સઘોષે કટકે ચૈવ ગુલ્ફોપરિવિભૂષાણમ્ ।
જઙ્ઘયોઃ પાદપત્રં સ્યાદઙ્ગુલીષ્વઙ્ગુલીયકમ્ ॥ ૪૦॥

અઙ્ગુષ્ઠતિલકાશ્ચૈવ પાદયોશ્ચ વિભૂષણમ્ ।
તથાલક્તકરાગશ્ચ નાનાભક્તિનિવેશિતઃ ॥ ૪૧॥

અશોકપલાવચ્છાયઃ સ્યાત્ સ્વાભાવિક એવ ચ ।
એતદ્વિભૂષણં નાર્યા આકેશાદાનખાદપિ ॥ ૪૨॥

યથાભવરસાવસ્થં વિજ્ઞેયં દ્વિજસત્તમાઃ ।
આગમશ્ચ પ્રમાણં ચ રૂપનિર્વર્ણનં તથા ॥ ૪૩॥

વિશ્વકર્મમતાત્કાર્યં સુબુદ્ધ્યાપિ પ્રયોક્તૃભિઃ ।
ન હિ શક્યં સુવર્ણેન મુક્તાભિર્મણિભિસ્તથા ॥ ૪૪॥

સ્વાધીનમિતિ રુચ્યૈવ કર્તુમઙ્ગસ્ય ભૂષણમ્ ।
વિભાગતોઽભિપ્રયુક્તમઙ્ગશોભાકરં ભવેત્ ॥ ૪૫॥

યથા સ્થાનાન્તરગતં ભૂષણં રત્નસંયુતમ્ ।
ન તુ નાટ્યપ્રયોગેષુ કર્તવ્યં ભૂષણં ગુરુ ॥ ૪૬॥

ખેદં જનયતે તદ્ધિ સવ્યાયતવિચેષ્ટનાત્ ।
ગુરુભાવાવસન્નસ્ય સ્વેદો મૂર્છા ચ જાયતે ॥ ૪૭॥

ગુર્વાભરણસન્નો હિ ચેષ્ટાં ન કુરુતે પુનઃ ।
તસ્માત્તનુત્વચકૃતં સૌવર્ણં ભૂષણં ભવેત્ ॥ ૪૮॥

રત્નવજ્જતુબદ્ધં વા ન ખેદજનનં ભવેત્ ।
સ્વેચ્છયા ભૂષણવિધિર્દિવ્યાનામુપદિશ્યતે ॥ ૪૯॥

યત્નભાવવિનિષ્પન્નં માનુષાણાં વિભૂષણમ્ ।
[વેષ્ટિતં વિતતં ચૈવ સંઘાત્યં ગ્રથિમં તથ ॥ ૫૦॥

લમ્બશોભિ તથા ચૈવ માલ્યં પઞ્ચવિધં સ્મૃતમ્ ।

આચ્છાદનં બહુવિધં નાનાપત્તનસંભવમ્ ॥ ૫૧॥

તજ્જ્ઞેયં ત્રિપ્રકારં તુ શુદ્ધં રક્તં વિચિત્રિતમ્] ।
દિવ્યાનાં ભૂષણવિધિર્ય એષ પરિકીર્તિતઃ ॥ ૫૨॥

માનુષાણાં તુ કર્તવ્યો નાનાદેશસમાશ્રયઃ ।
ભૂષણૈશ્ચાપિ વેષૈશ્ચ નાનાવસ્થાસમાશ્રયૈઃ ॥ ૫૩॥

દિવ્યાઙ્ગનાનાં કર્તવ્યા વિભક્તિઃ સ્વસ્વભૂમિજા ।
વિદ્યાધરીણાં યક્ષીણામપ્સરોનાગયોષિતામ્ ॥ ૫૪॥

ઋષિદૈવતકન્યાનાં વેષૈર્નાનાત્વમિષ્યતે ।
તથા ચ સિદ્ધગન્ધર્વરાક્ષસાસુરયોષિતામ્ ॥ ૫૫॥

દિવ્યાનાં નરનારીણાં તથૈવ ચ શિખણ્ડકમ્ ।
શિખાપુટશિખણ્ડં તુ મુક્તાભૂયિષ્ઠભૂષણમ્ ॥ ૫૬॥

વિદ્યાધરીણાં કર્તવ્યઃ શુદ્ધો વેષપરિચ્છદઃ ।
યક્ષિણ્યોઽપ્સરશ્ચૈવ કર્યા રત્નવિભૂષણાઃ ॥ ૫૭॥

સમસ્તાનાં ભવેદ્વેષો યક્ષીણા કેવલં શિખા ।
દિવ્યનામિવ કર્તવ્યં નાગસ્ત્રીણાં વિભૂષણમ્ ॥ ૫૮॥

મુક્તામણિલતાપ્રાયાઃ ફણાસ્તાસાં તુ કેવલાઃ ।
કાર્યં તુ મુનિકન્યાનામેકવેણીધરં શિરઃ ॥ ૫૯॥

ન ચાપિ વિભૂષણવિધિસ્તાસાં વેષો વનોચિતઃ ।
મુક્તામરકતપ્રાયં મણ્ડનં સિદ્ધયોષિતામ્ ॥ ૬૦॥

તાસાં તુ ચૈવ કર્તવ્યં પીતવસ્ત્રપરિચ્છદમ્ ।
પદ્મરાગમણિપ્રાયં ગન્ધર્વીણાં વિભૂષણમ્ ॥ ૬૧॥

વીણાહસ્તશ્ચ કર્તવ્યઃ કૌસુમ્ભવસનસ્તથા ।
ઇન્દ્રનીલૈસ્તુ કર્તવ્યં રાક્ષસીણાં વિભૂષણમ્ ॥ ૬૨॥

સિતદંષ્ટ્રા ચ કર્તવ્યા કૃષ્ણવસ્ત્રપરિચ્છદમ્ ।
વૈડૂર્યમુક્તાભરણાઃ કર્તવ્યા સુરયોષિતામ્ ॥ ૬૩॥

શુકપિઞ્છનિભૈર્અર્વસ્ત્રૈઃ કાર્યસ્તાસાં પરિચ્છદઃ ।
પુષ્પરાગૈસ્તુ મણિભિઃ ક્વચિદ્વૈડૂર્યભૂષિતૈઃ ॥ ૬૪॥

દિવ્યવાનરનારીણાં કાર્યો નીલપરિચ્છદઃ ।
એવં શ‍ૃઙ્ગારિણઃ કાર્યા વેષા દિવ્યાઙ્ગનાશ્રયાઃ ॥ ૬૫॥

અવસ્થાન્તમાસાદ્ય શુદ્ધાઃ કાર્યાઃ પુનસ્તથા ।
માનુષીણાં તુ કર્તવ્યા નાનાદેશસમુદ્ભવાઃ ॥ ૬૬॥

વેષાભરણસંયોગાન્ ગદતસ્તાન્નિબોધત ।
આવન્ત્યયુવતીનાં તુ શિરસ્સાલકકુન્તલમ્ ॥ ૬૭॥

ગૌડીયાનામલકપ્રાયં સશિખાપાશવેણિકમ્ ।
આભીરયુવતીનાં તુ દ્વિવેણીધર એવ તુ ॥ ૬૮॥

શિરઃ પરિગમઃ કાર્યો નીલપ્રાયમથામ્બરમ્ ।
તથા પૂર્વોતરસ્ત્રીણાં સમુન્નદ્ધશિખણ્ડકમ્ ॥ ૬૯॥

આકેશાચ્છાદનં તાસાં દેશકર્મણિ કીર્તિતમ્ ।
તથૈવ દક્ષિણસ્ત્રીણાં કાર્યમુલ્લેખ્યસંશ્રયમ્ ॥ ૭૦॥

કુમ્ભીબન્ધકસંયુક્તં તથાવર્તલલાટિકમ્ ।
[ગણિકાનાં તુ કર્તવ્યમિચ્છાવિચ્છિત્તિ મણ્ડનમ્] ॥ ૭૧॥

દેશજાતિવિધાનેન શેષાણામપિ કારયેત્ ।
વેષં તથા ચાભરણં ક્ષુરકર્મ  પરિચ્છદમ્ ॥ ૭૨॥

[આગમં ચાપિ નૈપથ્યે નાટ્યસ્યૈવં પ્રયોજયેત્] ।
અદેશયુક્તો વેષો હિ ન શોભાં જનયિષ્યતિ ॥ ૭૩॥

મેખલોરસિ બદ્ધા તુ હાસ્યં સમુપપાદયેત્ ।
તથા પ્રોષિતકાન્તાસુ વ્યસનાભિહતાસુ ચ ॥ ૭૪॥

વેષો વૈ મલિનઃ કાર્ય એકવેણીધરં શિરઃ ।
વિપ્રલમ્ભે  તુ નાર્યાસ્તુ શુદ્ધો વેષો ભવેદિહ ॥ ૭૫॥

નાત્યાભરણસંયુક્તો ન ચાપિ મૃજયાન્વિતઃ ।
એવં સ્ત્રીણાં ભવેદ્વેષો દેશાવસ્થાસમુદ્ભવઃ ॥ ૭૬॥

પુરુષાણાં પુનશ્ચૈવ વેષાન્વક્ષ્યામિ તત્ત્વતઃ ।
તત્રાઙ્કુરચના પૂર્વં કર્તવ્યા નાટ્યયોક્તૃભિઃ ॥ ૭૭॥

તતઃ પરં પ્રયોક્તવ્યા વેષા દેશસમુદ્ભવાઃ ।
સિતો નીલશ્ચ પીતશ્ચ ચતુર્થો રક્ત એવ ચ ॥ ૭૮॥

એતે સ્વભાવજા વર્ણા યૈઃ કાર્યં ત્વઙ્ગવર્તનમ્ ।
સંયોગજાઃ પુનશ્ચાન્યે ઉપવર્ણા ભવન્તિ હિ ॥ ૭૯ ॥

તાનહં સમ્પ્રવક્ષ્યામિ યથાકાર્યં પ્રયોક્તૃભિઃ ।
સિતનીલસમાયોગે કારણ્ડવ ઇતિ સ્મૃતઃ ॥ ૮૦ ॥

સિતપીતસામાયોગાત્પાણ્ડુવર્ણઃ પ્રકીર્તિતઃ ।
સિતિઅરક્તસમાયોગે પદ્મવર્ણઃ પ્રકીર્તિતઃ ॥ ૮૧ ॥

પીતનીલસમાયોગાદ્ધરિતો નામ જાયતે ।
નીલરક્તસમાયોગાત્કષાયો નામ જાયતે ॥ ૮૨ ॥

રક્તપીતસમાયોગાદ્ગૌરવર્ણ ઇતિ સ્મૃતઃ ।
એતે સંયોગજા વર્ણા હ્યુપવર્ણાસ્તથાપરે ॥ ૮૩ ॥

ત્રિચતુર્વર્ણસંયુક્તા બહવઃ સમ્પ્રકીર્તિતાઃ ।
બલસ્થો યો ભવેદ્વર્ણસ્તસ્ય ભાગો ભવેત્તતઃ ॥ ૮૪ ॥

દુર્બલસ્ય ચ ભાગૌ દ્વૌ નીલં મુક્ત્વા પ્રદાપયેત્ ।
નીલસ્યૈકો ભવેદ્ભાગશ્ચત્વારોઽન્યે તુ વર્ણકે ॥ ૮૫ ॥

બલવાન્સર્વવર્ણાનાં નીલ એવ પ્રકીર્તિતઃ ।
એવં વર્ણવિધિં જ્ઞાત્વા નાનાસંયોગસંશ્રયમ્ ॥ ૮૬ ॥

તતઃ કુર્યાદ્યથાયોગમઙ્ગાનાં વર્તનં બુધઃ ।
વર્તનચ્છાદનં રૂપં સ્વવેષપરિવર્જિતમ્ ॥ ૮૭ ॥

નાટ્યધર્મપ્રવૃત્તં તુ જ્ઞેયં તત્પ્રકૃતિસ્થિતમ્ ।
સ્વવર્ણમાત્મનશ્છાદ્યં વર્ણકૈર્વેષસંશ્રયૈઃ ॥ ૮૮ ॥

આકૃતિસ્તસ્ય કર્તવ્યા યસ્ય પ્રકૃતિરાસ્થિતા ।
યથા જન્તુઃ સ્વભાવં સ્વં પરિત્યજ્યાન્યદૈહિકમ્ ॥ ૮૯ ॥

તત્સ્વભાવં હિ ભજતે દેહાન્તરમુપાશ્રિતઃ ।
વેષેણ વર્ણકૈશ્ચૈવ ચ્છાદિતઃ પુરુષસ્તથા ॥ ૯૦ ॥

પરભાવં પ્રકુરુતે યસ્ય વેષં સમાશ્રિતઃ ।
દેવદાનવગન્ધર્વયક્ષરાક્ષસપન્નગાઃ ॥ ૯૧ ॥

પ્રાણિસંજ્ઞાઃ સ્મૃતા હ્યેતે જીવબન્ધાશ્ચ યેઽપરે ।

[સ્ત્રીભાવાઃ પર્વતાઃ નદ્યઃ સમુદ્રા વાહનાનિ ચ ॥ ૯૨॥

નાનાશસ્ત્રાણ્યપિ તથા વિજ્ઞેયાઃ પ્રાણિસંજ્ઞયા] ।
શૈલપ્રાસાદયન્ત્રાણિ ચર્મવર્મધ્વજાસ્તથા ॥ ૯૩॥

નાનાપ્રહરણાદ્યાશ્ચ તેઽપ્રાણિન ઇતિ સ્મૃતાઃ ।
અથવા કારણોપેતા ભવન્ત્યેતે શરીરિણઃ ॥ ૯૪॥

વેષભાષાશ્રયોપેતા નાટ્યધર્મમવેક્ષ્ય તુ ।
વર્ણાનાં તુ વિધિં જ્ઞાત્વા વયઃ પ્રકૃતિમેવ ચ ॥ ૯૫॥

કુર્યાદઙ્ગસ્ય રચનાં દેશજાતિવયઃશ્રિતતામ્ ।
દેવા ગૌરાસ્તુ વિજ્ઞેયા યક્ષાશ્ચાપ્સરસ્તથા ॥ ૯૬॥

રુદ્રાર્કદ્રુહિણસ્કન્દાસ્તપનીયપ્રભાઃ સ્મૃતાઃ ।
સોમો બૃહસ્પતિઃ શુક્રો વરુણસ્તારકાગણાઃ ॥ ૯૭॥

સમુદ્રહિમવદ્ગઙ્ગાઃ શ્વેતા હિ સ્યુર્બલસ્તથા ।
રક્તમઙ્ગારકં વિદ્યાત્ પીતૌ બુધહુતાશનૌ ॥ ૯૮॥

નારાયણો નરશ્ચૈવ શ્યામો નાગશ્ચ વાસુકિઃ ।
દૈત્યાશ્ચ દાનવાશ્ચૈવ રાક્ષસા ગુહ્યકા નગાઃ ॥ ૯૯॥

પિશાચા જલમાકાશમસિતાનિ તુ વર્ણતઃ ।
ભવન્તિ ષટ્સુ દ્વીપેષુ પુરુષશ્ચૈવ વર્ણતઃ ॥ ૧૦૦॥

કર્તવ્યા નાટ્યયોગેન નિષ્ટપ્તકનકપ્રભાઃ ।
જામ્બૂદ્વીપસ્ય વર્ષે તુ નાનાવર્ણાશ્રયા નરાઃ ॥ ૧૦૧॥

ઉત્તરાંસ્તુ કુરુસ્ત્યક્ત્વા તે ચાપિ કનકપ્રભાઃ ।
ભદ્રાશ્વપુરુષાઃ શ્વેતાઃ કર્તવ્યા વર્ણતસ્તથા ॥ ૧૦૨॥

કેતુમાલે નરા નીલા ગૌરાઃ શેષેષુ કીર્તિતાઃ ।
નાનાવર્ણાઃ સ્મૃતા ભૂતા ગન્ધર્વા યક્ષપન્નગાઃ ॥ ૧૦૩॥

વિદ્યાધરાસ્તથા ચૈવ પિતરસ્તુ સમા નરાઃ ।
પુનશ્ચ ભારતે વર્ષે તાંસ્તાન્વર્ણાન્નિબોધત ॥ ૧૦૪॥

રાજાનઃ પદ્મવર્ણાસ્તુ ગૌરાઃ શ્યામાસ્તથૈવ ચ ।
યે ચાપિ સુખિનો મર્ત્યા ગૌરા કાર્યાસ્તુ વૈઃ બુધૈઃ ॥ ૧૦૫॥

કુકર્મિણો ગ્રહગ્રસ્તાઃ વ્યાધિતાસ્તપસિ સ્થિતાઃ ।
આયસ્તકર્મિણશ્ચૈવ હ્યસિતાશ્ચ કુજાતયઃ ॥ ૧૦૬॥

ઋષ્યયશ્ચૈવ  કર્તવ્યા નિત્યં તુ બદરપ્રભાઃ ।
તપઃસ્થિતાશ્ચ ઋષયો  નિત્યામેવાસિતા બુધૈઃ ॥ ૧૦૭॥

કારણવ્યપદેશેન તથા ચાત્મેચ્છયા પુનઃ ।
વર્ણસ્તત્ર પ્રકર્તવ્યો દેશજતિવશાનુગઃ ॥ ૧૦૮॥

દેશં કર્મ ચ જાતિં ચ પૃથિવ્યુદ્દેશસંશ્રયમ્ ।
વિજ્ઞાય વર્તના કાર્યા પુરુષાણાં પ્રયોગતઃ ॥ ૧૦૯॥

કિરાતબર્બરાન્ધ્રાશ્ચ દ્રવિડાઃ કાશિકોસલાઃ ।
પુલિન્દા દાક્ષિણાત્યાશ્ચ પ્રાયેણ ત્વસિતાઃ સ્મૃતાઃ ॥ ૧૧૦॥

શકાશ્ચ યવનાશ્ચૈવ પહ્લવા વાહ્લિકાશ્ચ યે ।
પ્રાયેણ ગૌરાઃ કર્તવ્યા ઉત્તરા યે શ્રિતા દિશમ્ ॥ ૧૧૧॥

પાઞ્ચાલાઃ શૌરસેનાશ્ચ માહિષાશ્ચૌડ્રમાગધાઃ ।
અઙ્ગા વઙ્ગાઃ કલિઙ્ગાશ્ચ શ્યામાઃ કાર્યાસ્તુ વર્ણતઃ ॥ ૧૧૨॥

બ્રાહ્મણાઃ ક્ષત્રિયાશ્ચૈવ ગૌરાઃ કાર્યાસ્તથૈવ હિ ।
વૈશ્યાઃ શૂદ્રાસ્તથા ચૈવ શ્યામાઃ કાર્યાસ્તુ વર્ણતઃ ॥ ૧૧૩॥

એવં કૃત્વા યથાન્યાયં મુખાઙ્ગોપાઙ્ગવર્તનામ્ ।
શ્મશ્રુકર્મ પ્રયુઞ્જીત દેશકાલવયોઽનુગમ્ ॥૧૧૪॥

શુદ્ધં વિચિત્રં શ્યામં ચ તથા રોમશમેવ ચ ।
ભવેચ્ચતુર્વિધં શ્મશ્રુ નાનાવસ્થાન્તરાત્મકમ્ ॥ ૧૧૫॥

શુદ્ધં તુ લિઙ્ગિનાં કાર્યં તથામાત્યપુરોધસામ્ ।
મધ્યસ્થા યે ચ પુરુષા યે ચ દીક્ષાં સમાશ્રિતાઃ ॥ ૧૧૬॥

દિવ્યા યે પુરુષાઃ કેચિત્સિદ્ધવિદ્યાધરાદયઃ ।
પાર્થિવાશ્ચ કુમારાશ્ચ યે ચ રાજોપજીવિનઃ ॥ ૧૧૭॥

શૃઙ્ગારિણશ્ચ યે મર્ત્યા યૌવનોન્માદિનશ્ચ યે ।
તેષાં વિચિત્રં કર્તવ્યં શ્મશ્રુ નાટ્યપ્રયોક્તૃભિઃ ॥ ૧૧૮॥

અનિસ્તીર્ણપ્રતિજ્ઞાનાં દુઃખિતાનાં તપસ્વિનામ્ ।
વ્યસનાભિહતાનાં ચ શ્યામં શ્મશ્રુ પ્રયોજયેત્ ॥ ૧૧૯॥

ઋષીણાં તાપસાનાં ચ યે ચ દીર્ઘવ્રતા નરાઃ ।
તથા ચ ચીરબદ્ધાનાં રોમશં શ્મશ્રુ કીર્તિતમ્ ॥ ૧૨૦॥

એવં નાનાપ્રકારં તુ શ્મશ્રુ કાર્યં પ્રયોક્તૃભિઃ ।
અત ઊર્ધ્વં પ્રવક્ષ્યામિ વેષાન્નાનાપ્રયોગજાન્ ॥ ૧૨૧॥

શુદ્ધો વિચિત્રો મલિનસ્ત્રિવિધો વેષ ઉચ્યતે ।
તેષાં નિયોગં વક્ષ્યામિ યથાવદનુપૂર્વશઃ ॥ ૧૨૨॥

દેવાભિગમને ચૈવ મઙ્ગલે નિયમસ્થિતે ।
તિથિનક્ષત્રયોગે ચ વિવાહકરણે તથા ॥ ૧૨૩॥

ધર્મપ્રવૃત્તં યત્કર્મ સ્ત્રિયો  વા પુરુષસ્ય વા ।
વેષસ્તેષાં ભવેચ્છુદ્ધો  યે ચ પ્રાયત્નિકા નરાઃ ॥ ૧૨૪॥

દેવદાનવયક્ષાણાં ગન્ધર્વોરગરક્ષસામ્ ।
નૃપાણાં કર્કશાનાં  ચ ચિત્રો વેષ ઉદાહૃતઃ ॥ ૧૨૫॥

વૃદ્ધાનાં બ્રાહ્મણાનાં ચ શ્રેષ્ઠ્યમાત્યપુરોધસામ્ ।
વણિજાં કાઞ્ચુકીયાનાં તથા ચૈવ તપસ્વિનામ્ ॥ ૧૨૬॥

વિપ્રક્ષેત્રિયવૈશ્યાનાં સ્થાનીયા યે ચ માનવાઃ ।
શુદ્ધો વસ્ત્રવિધિસ્તેષાં કર્તવ્યો નાટકાશ્રયઃ ॥ ૧૨૭॥

ઉન્મત્તાનાં પ્રમત્તાનામધ્વગાનાં તથૈવ ચ ।
વ્યસનોપહતાનાં ચ મલિનો વેષ ઉચ્યતે ॥ ૧૨૮॥

શુદ્ધરક્તવિચિત્રાણિ વાસાંસ્યૂર્ધ્વામ્બરાણિ ચ ।
યોજયેન્નાટ્યતત્ત્વજ્ઞો વેષયોઃ શુદ્ધચિત્રયોઃ ॥ ૧૨૯॥

કુર્યાદ્વેષે તુ મલિને મલિનં તુ વિચક્ષણઃ ।
મુનિનિર્ગ્રન્થશાક્યેષુ યતિપાશુપતેષુ ચ ॥ ૧૩૦॥

વ્રતાનુગસ્તુ કર્તવ્યો વેષો લોકસ્વભાવતઃ ।
ચીરવલ્કલચર્માણિ તાપસાનાં તુ યોજયેત્ ॥ ૧૩૧॥

પરિવાણ્મુનિષ્ક્યાનાં વાસઃ કાષાયમિષ્યતે ।
નાનાચિત્રાણિ વાસાંસિ કુર્યાત્પાશુપતેષ્વથ ॥ ૧૩૨॥

કુજાતયશ્ચ યે પ્રોક્તાસ્તેષાં ચૈવ યથાર્હતઃ ।

અન્તઃપુરપ્રવેશે ચ વિનિયુક્તા હિ યે નરાઃ ॥ ૧૩૩ ॥

કાષાયકઞ્ચુકપટાઃ કાર્યાસ્તેઽપિ યથાવિધિ ।
અવસ્થાનતરતશ્ચૈવ નૃણાં વેષો ભવેદથ ॥ ૧૩૪ ॥

વેષઃ સાંગ્રામિકશ્ચૈવ શૂરાણાં સંપ્રકીર્તિતઃ ।
વિચિત્રશસ્ત્રકવચો બદ્ધતૂણો ધનુર્ધરઃ ॥ ૧૩૫ ॥

ચિત્રો વેષસ્તુ કર્તવ્યો નૃપાણાં નિત્યમેવ ચ ।
કેવલસ્તુ ભવેચ્છુદ્ધો નક્ષત્રોત્પાતમઙ્ગલે ॥ ૧૩૬ ॥

એવમેષ ભવેદ્વેષો દેશજાતિવયોઽનુગઃ ।
ઉત્તમાધમમધ્યાનાં સ્ત્રીણાં નૃણામથાપિ ચ ॥ ૧૩૭ ॥

એવં વસ્ત્રવિધિઃ કાર્યઃ પ્રયોગે નાટકાશ્રયે ।
નાનાવસ્થાં સમાસાદ્ય શુભાશુભકૃતસ્તથા ॥ ૧૩૮ ॥

તથા પ્રતિશિરશ્ચાપિ કર્તવ્યં નાટકાશ્રયમ્ ।
દિવ્યાનાં માનુષાણાં ચ દેશજાતિવયઃશ્રિતમ્ ॥ ૧૩૯ ॥

પાર્શ્વાગતા મસ્તકિનસ્તથા ચૈવ કિરીટિનઃ ।
ત્રિવિધો મુકુટો જ્ઞેયો દિવ્યપાર્થિવસંશ્રિતઃ ॥ ૧૪૦ ॥

દેવગન્ધર્વયક્ષાણાં પન્નગાનાં સરક્ષસામ્ ।
કર્તવ્યા નૈકવિહિઅત મુકુટાઃ પાર્શ્વમૌલયઃ ॥ ૧૪૧ ॥

ઉત્તમા યે ચ દિવ્યાનાં તે ચ કાર્યાઃ કિરીટિનઃ ।
મધ્યમા મૌલિનશ્ચૈવ કનિષ્ઠાઃ ષિર્ષમૌલિનઃ ॥ ૧૪૨ ॥

નરાધિપાનાં કર્તવ્યા મસ્તકે મુકુટા બુધૈઃ ।
વિદ્યાધરાણાં ચ સિદ્ધાનાં ચારણાનાં તથૈવ ચ ॥ ૧૪૩ ॥

ગ્રન્થિમત્કેશમુકુટાઃ કર્તવ્યાસ્તુ પ્રયોક્તૃભિઃ ।
રાક્ષોદાનવદૈત્યાનાં પિઙ્ગકેશેક્ષણાનિ હિ ॥ ૧૪૪ ॥

હરિચ્છ્શ્મશ્રૂણિ ચ તથા મુકુટાસ્યાનિ કારયેત્ ।
ઉત્તમશ્ચાપિ યે તત્ર તે કાર્યાઃ પાર્શ્વમૌલિનઃ ॥ ૧૪૫ ॥

કસ્માત્તુ મુકુટાઃ સૃષ્ટાઃ પ્રયોગે દિવ્ય્પાર્થિવે ।
કેશાનાં છેદનં દૃષ્ટં વેદવાદે યથાશ્રુતિ ॥ ૧૪૬ ॥

ભદ્રીકૃતસ્ય વા યજ્ઞે શિરસશ્છાદનેચ્છયા ।
કેશાનામપ્યદીર્ઘત્વાત્સ્મૃતં મુકુટધારણમ્ ॥ ૧૪૭॥

સેનાપતેઃ પુનશ્ચાપિ યુવરાજસ્ય ચૈવ હિ ।
યોજયેદર્ધમુકુટં મહામાત્રાશ્ચ યે નરાઃ ॥ ૧૪૮॥

અમાત્યાનાં કઞ્ચુકિનાં તથા શ્રેષ્ઠિપુરોધસામ્ ।
વેષ્ટનાબદ્ધપટ્ટાનિ પ્રતિશીર્ષાણિ કારયેત્ ॥ ૧૪૯॥

પિશાચોન્મત્તભૂતાનાં સાધકાનાં તપસ્વિનામ્ ।
અનિસ્તીર્ણપ્રતિજ્ઞાનાં લમ્બકેશં ભવેચ્છિરઃ ॥ ૧૫૦॥

શાક્યશ્રોત્રિયનિર્ગ્રન્થપરિવ્રાડ્દીક્ષિતેષુ ચ ।
શિરોમુણ્ડં તુ કર્તવ્યં યજ્ઞદીક્ષાન્વિતેષુ ચ ॥ ૧૫૧॥

તથા વ્રતાનુગં ચૈવ શેષાનાં લિઙ્ગિનાં શિરઃ ।
મુણ્ડં વા કુઞ્ચિતં વાપિ લમ્બકેશમથાપિ વા ॥ ૧૫૨॥

ધૂર્તાનાં ચૈવ કર્તવ્યં યે ચ રાત્ર્યુપજીવિનઃ ।
શ‍ૃઙ્ગારચિત્તાઃ પુરુષાસ્તેષાં કુઞ્ચિતમૂર્ધજાઃ ॥ ૧૫૩॥

બાલાનામપિ કર્તવ્યં ત્રિશિખણ્ડવિભૂષિતમ્ ।
જટામકુટબદ્ધં ચ મુનીનાં તુ ભવેચ્છિરઃ ॥ ૧૫૪॥

ચેટાનામપિ કર્તવ્યં ત્રિશિખં મુણ્ડમેવ વા ।
વિદૂષકસ્ય ખલતિઃ સ્યાત્કાકપદમેવ વા ॥ ૧૫૫॥

શીષાણામર્થયોગેન દેશજાતિસમાશ્રયમ્ ।
શિરઃ પ્રયોક્તૃભિઃ કાર્યં નાનાવસ્થાન્તરાશ્રયમ્ ॥ ૧૫૬॥

ભૂષણૈર્વર્ણકૈર્વસ્ત્રૈર્માલ્યૈશ્ચૈવ યથાવિધિ ।
એવં નાનાપ્રકારૈસ્તુ બુદ્ધ્યા વેષાન્પ્રકલ્પયેત્ ॥ ૧૫૭॥

પૂર્વં તુ પ્રકૃતિં સ્થાપ્ય પ્રયોગગુણસંભવામ્ ।
સ્ત્રીણાં વા પુરુષાણાં વાપ્યવસ્થાં પ્રાપ્ય તાદૃશીમ્ ॥

૧૫૮॥

સર્વે ભાવાશ્ચ દિવ્યાનાં કાર્યા માનુષસંશ્રયાઃ ।
તેષાં ચાનિમિષત્વાદિ નૈવ કાર્યં પ્રયોક્તૃભિઃ ॥ ૧૫૯॥

ઇહ ભાવરસાશ્ચૈવ દૃષ્ટિભિઃ સમ્પ્રતિષ્ઠિતાઃ ।
દૃષ્ટ્યૈવ સ્થાપિતો હ્યર્થઃ પશ્ચાદઙ્ગૈર્વિભાવ્યતે ॥ ૧૬૦॥

એવં ક્રીયાઙ્ગરચના નાનાપ્રકૃતિસંભવા ।
સજીવ ઇતિ યઃ પ્રોક્તસ્તસ્ય વક્ષ્યામિ લક્ષણમ્ ॥ ૧૬૧॥

યઃ પ્રાણિનાં પ્રવેશો વૈ સજીવ ઇતિ સંજ્ઞિતઃ ।
ચતુષ્પદોઽથ દ્વિપદસ્તથા ચૈવાપદઃ સ્મૃતઃ ॥ ૧૬૨॥

ઉરગાનપદાન્ વિદ્યાદ્ દ્વિપદાન્ખગમાનુષાન્ ।
ગ્રામ્યા આરણ્યાઃ પશવો વિજ્ઞેયાઃ સ્યુશ્ચતુષ્પદાઃ ॥ ૧૬૩॥

યે તે  તુ યદ્ધસંફેટૈરુપરોધૈસ્તથૈવ ચ ।
નાનાપ્રહરણોપેતાઃ પ્રયોજ્યા નાટકે બુધૈઃ ॥ ૧૬૪॥

આયુધાનિ ચ કાર્યાણિ પુરુષાણાં પ્રમાણતઃ ।
તાન્યહં વર્તયિષ્યામિ યથાપુસ્તપ્રમાણતઃ ॥ ૧૬૫॥

ભિણ્ડિર્દ્વાદશતાલઃ સ્યાદ્દશ કુન્તો ભવેદથ ।
અષ્ટૌ શતઘ્ની શૂલં ચ તોમરઃ શક્તિરેવ વા ॥ ૧૬૬॥

અષ્ટૌ તાલા ધનુર્જ્ઞેયમાયામોઽસ્ય દ્વિહસ્તકઃ ।
શરો ગદા ચ વજ્રા ચ ચતુસ્તાલં વિધીયતે  ॥ ૧૬૭॥

અઙ્ગુલાનિ ત્વસિઃ કાર્યશ્ચત્વારિંશત્પ્રમાણતઃ ।
દ્વાદશાઙ્ગુલકં ચક્રં તતોઽર્ધં પ્રાસ  ઇષ્યતે ॥ ૧૬૮॥

પ્રાસવત્પટ્ટસં વિદ્યાદ્દણ્ડશ્ચૈવ તુ વિંશતિઃ ।
વિંશતિઃ કણયશ્ચૈવ હ્યઙ્ગુલાનિ પ્રમાણતઃ  ॥ ૧૬૯॥

શોડષાઙ્ગુલવિસ્તીર્ણં સબલં સમ્પ્રઘણ્ટિકમ્ ।
ત્રિંશદઙ્ગુલિમાનેન કર્તવ્યં ખેટકં બુધૈઃ ॥ ૧૭૦॥

જર્જરો દણ્ડકાષ્ઠં ચ તથૈવ પ્રતિશીર્ષકમ્ ।
છત્રં ચામરં  ચૈવ ધ્વજો શ‌ૃઙ્ગાર એવ ચ ॥ ૧૭૧॥

યત્કિઞ્ચિન્માનુષે લોકે દ્રવ્યં પુંસાં પ્રયોજકમ્ ।
યચ્ચોપકરણં સર્વં નાટ્યે તત્સમ્પ્રકીર્તિતમ્ ॥ ૧૭૨॥

યદ્યસ્ય વિષયપ્રાપ્તં  તેનોહ્યં  તસ્ય લક્ષણમ્  ।
જર્જરે દણ્ડકાષ્ઠે  ચ સમ્પ્રવક્ષ્યામિ લક્ષણમ્ ॥ ૧૭૩॥

માહેન્દ્રા વૈ ધ્વજાજ઼્ પ્રોક્તા લક્ષણૈર્વિશ્વકર્મણા ।
એષાન્ચતમં કુર્યાજ્જર્જરં દારુકર્મતઃ ॥ ૧૭૪॥

અથવા વૃક્ષયોનિઃ સ્યાત્પ્રરોહો વાપિ જર્જરઃ ।
વેણુરેવ ભવેચ્છ્રેષ્ઠસ્તસ્ય વક્ષ્યામિ લક્ષણમ્ ॥૧૭૫॥

શ્વેતભૂમ્યાં તુ યો જાતઃ પુષ્યનક્ષત્રજસ્તથા ।
સંગ્રાહ્યો વૈ ભવેદ્વેણુર્જર્જરાર્થે પ્રયત્નતઃ ॥ ૧૭૬॥

પ્રમાણમઙ્ગુલાનાં તુ શતમષ્ટોત્તર૮ં ભવેત્ ।
પઞ્ચપર્વા ચતુર્ગ્રન્થિસ્તાલમાત્રસ્તથૈવ ચ ॥ ૧૭૭॥

સ્થૂલગ્રન્થિર્ન કર્તવ્યો ન શાખી ન ચ કીટવાન્ ।
ન કૃમિક્ષતપર્વા ચ ન હીનશ્ચાન્યવેણુભિઃ ॥ ૧૭૮॥

મધુસર્પિસ્સર્ષપાક્તં માલ્યધૂપપુરસ્કૃતમ્ ।
ઉપાસ્ય વિધિવદ્વેણું ગૃહ્ણિયાજ્જર્જરં પ્રતિ ॥ ૧૭૯॥

યો વિધિર્યઃ ક્રમશ્ચૈવ માહેબ્દ્રે તુ ધ્વજે સ્મૃતઃ ।
સ જર્જરસ્ય કર્તવ્યઃ પુષ્યવેણુસમાશ્રયઃ ॥ ૧૮૦॥

ભવેદ્યો દીર્ઘપર્વા તુ તનુપત્રસ્તથૈવ ચ ।
પર્વાગ્રતણ્ડુલશ્ચૈવ પુષ્યવેણુઃ સ કીર્તિતઃ ॥ ૧૮૧॥

વિધિરેષ મયા પ્રોક્તો જર્જરસ્ય પ્રમાણતજ઼્ઃ ।
અત ઊર્ધ્વં પ્રવક્ષ્યામિ દણ્ડકાષ્ઠસ્ય લક્ષણમ્ ॥ ૧૮૨॥

કપિત્થબિલ્વવંશેભ્યો દણ્ડકાષ્ઠં ભવેદથ ।
વક્રં ચૈવ હિ કર્તવ્યં ત્રિભાગે લક્ષણાન્વિતમ્ ॥ ૧૮૩॥

કીટૈર્નોપહતં યચ્ચ વ્યાધિના ન ચ પીડિતમ્ ।
મન્દશાખં ભવેદ્યચ્ચ દણ્ડકાષ્ઠં તુ તદ્ભવેત્ ॥૧૮૪॥

યસ્ત્વેભિર્લક્ષણૈર્હીનં દણ્ડકાષ્ઠં સજર્જરમ્ ।
કારયેત્સ ત્વપચયં મહાન્તં પ્રાપ્નુયાદ્ધ્રુવમ્ ॥ ૧૮૫॥

અથ શીર્ષવિભાગાર્થં ઘટી કાર્યા પ્રયત્નતઃ ।
સ્વપ્રમાણવિનિર્દિષ્ટા દ્વાત્રિંશત્યઙ્ગુલાનિ વૈ ॥ ૧૮૬॥

બિલ્વમધ્યેન કર્તવ્યા ઘટી સિરસમાશ્રયા ।

સ્વિન્નેન બિલ્વકલ્કેન દ્રવેણ ચ સમન્વિતા ॥ ૧૮૭॥

ભસ્મના વા તુષૈર્વાપિ કારયેત્પ્રતિશીર્ષકમ્ ।
સંછાદ્ય તુ તતો વસ્ત્રૈર્બિલ્વદુગ્ધૈર્ઘટાશ્રયૈઃ ॥ ૧૮૮॥

બિલ્વકલ્કેન ચીરં તુ દિગ્ધ્વા સંયોજયેદ્ઘટીમ્ ।
ન સ્થૂલાં નાનતાં તન્વીં દીર્ઘાં નૈવ ચ કારયેત્। ॥ ૧૮૯॥

તસ્યામાતપશુષ્કાયાં સુશુષ્કાયામથાપિ વા ।
છેદ્યં બુધાઃ પ્રકુર્વન્તિ વિધિદૃષ્ટેન કર્મણા ॥ ૧૯૦॥

સુતીક્ષ્ણેન તુ શસ્ત્રેણ અર્ધાર્ધં પ્રવિભજ્ય ચ ।
સ્વપ્રમાણવિનિર્દિષ્ટં લલાટકૃતકોણકમ્ ॥ ૧૯૧॥

અર્ધાઙ્ગુલં લલાટં તુ  કાર્યં છેદ્યં ષડઙ્ગુલમ્ ।
અર્ધાર્ધમઙ્ગુલં છેદ્યં કટયોર્દ્વ્યઙ્ગુલં ભવેત્ ॥ ૧૯૨॥

કટાન્તે કર્ણનાલસ્ય છેદ્યં દ્વ્યધિકમઙ્ગુલમ્ ।
ત્ર્યઙ્ગુલં કર્ણવિવરં તથા સ્યાચ્છેદ્યમેવ હિ ॥ ૧૯૩॥

તતશ્ચૈવાવટુઃ કાર્યા સુસમા દ્વાદશાઙ્ગુલા ।
ઘટ્યાં હ્યેતત્સદા ચ્છેદ્યે વિધાનં વિહિતં મયા ॥ ૧૯૪॥

તસ્યોપરિગતા કાર્યા મુકુટા બહુશિલ્પજાઃ ।
નાનારત્નપ્રતિચ્છન્ના બહુરૂપોપશોભિતાઃ ॥ ૧૯૪॥

તથોપકરણાનીહ નાટ્યયોગકૃતાનિ વૈ ।
બહુપ્રકારયુક્તાનિ કુર્વીત પ્રકૃતિં પ્રતિ ॥ ૧૯૬॥

યત્કિઞ્ચિદસ્મિન્ લોકે તુ ચરાચરસમન્વિતે ।
વિહિતં કર્મ શિલ્પં વા તત્તૂપકરણં સ્મૃતમ્ ॥૧૯૭॥

યદ્યસ્ય વિષયં પ્રાપ્તં તત્તદેવાભિગચ્છતિ ।
નાસ્તન્તઃ પુરુષાણાં હિ નાટ્યોપકરણાશ્રયે ॥ ૧૯૮॥

યદ્યેનોત્પાદિતં કર્મ શિલ્પયોગક્રિયાપિ વા ।
તસ્ય તેન કૃતા સૃષ્ટિઃ પ્રમાણં લક્ષણં તથા  ॥ ૧૯૯॥

યા કાષ્ઠયન્ત્રભૂયિષ્ઠા કૃતા સૃષ્ટિર્મહાત્મના ।
ન સાસ્માકં નાટ્યયોગે કસ્માત્ખેદાવહા હિ સા ॥ ૨૦૦॥

યદ્દ્રવ્યં જીવલોકે તુ નાનાલક્ષણલક્ષિતમ્ ।
તસ્યાનુકૃતિસંસ્થાનં નાટ્યૂપકરણં ભવેત્ ॥ ૨૦૧॥

પ્રાસાદગૃહયાનાનિ નાનાપ્રહરણાનિ ચ ।
ન શક્યં તાનિ વૈ કર્તું યથોક્તાનીહ લક્ષણૈઃ ॥ ૨૦૨॥

લોકધર્મી ભવેત્ત્વન્યા નાટ્યધર્મી તથાપરા ।
સ્વભાવો લોકધર્મી તુ વિભાવો નાટ્યમેવ હિ ॥ ૨૦૩॥

આયસં ન તુ કર્તવ્યં ન ચ સારમયં તથા ।
નાટ્યોપકરણં તજ્જ્ઞૈર્ગુરુખેદકર૮ ભવેત્ ॥ ૨૦૪॥

કાષ્ઠચર્મસુ વસ્ત્રેષુ જતુવેણુદલેષુ ચ ।
નાટ્યોપકરણાનીહ લઘુકર્માણિ કારયેત્ ॥ ૨૦૫॥

ચર્મવર્મધ્વજાઃ શૈલાઃ પ્રાસાદા દેવતાગૃહાઃ ।
હયવારણયાનાનિ વિમાનાનિ ગૃહાણિ ચ ॥ ૨૦૬॥

પૂર્વં વેણુદલૈઃ કૃત્વા કૃતીર્ભાવસમાશ્રયાઃ ।
તતઃ સુરઙ્ગૈરચ્છાદ્ય વસ્ત્રૈઃ સારૂપ્યમાનયેત્ ॥ ૨૦૭॥

અથવા યદિ વસ્ત્રાણામસાન્નિધ્યં ભવેદિહ ।
તાલીયૈર્વા કિલિઞ્જૈર્વા શ્લક્ષ્ણૈર્વસ્ત્રક્રિયા ભવેત્ ॥ ૨૦૮॥

તથા પ્રહરણાનિ સ્યુસ્તૃણવેણુદલાદિભિઃ ।
જન્તુભાણ્ડક્રિયાભિશ્ચ નાનારૂપાણિ નાટકે ॥ ૨૦૯॥

પ્રતિપાદં પ્રતિશિરઃ પ્રતિહસ્તં પ્રતિત્વચમ્ ।
તૃણૈઃ કિલિઞ્જૈર્ભાણ્ડૈર્વા સારૂપ્યાણિ તુ કારયેત્ ॥ ૨૧૦॥

યદ્યસ્ય સદૃશં રૂપં સારૂપ્યગુણસંભવમ્ ।
મૃણ્મયં તત્તુ કૃત્સ્નં તુ નાનારૂપં તુ કારયેત્ ॥ ૨૧૧॥

ભાણ્ડવસ્ત્રમધૂચ્છિષ્ટૈર્લાક્ષયાભ્રદલેન ચ ।
નાગાસ્તે વિવિધાઃ કાર્યા હ્યતસીશણબિલ્વજૈઃ ॥ ૨૧૨॥

નાનાકુસુમજાતીશ્ચ ફલાનિ વિવિધાનિ ચ ।
ભાણ્ડવસ્ત્રમધૂચ્છિષ્ટૈર્લાક્ષયા વાપિ કારયેત્ ॥ ૨૧૩॥

ભાણ્ડવસ્ત્રમધૂચ્છિષ્ટૈસ્તામ્રપત્રૈસ્તથૈવ ચ ।
સમ્યક્ય નીલીરાગેણાપ્યભ્રપત્રેણ ચૈવ હિ ॥ ૨૧૪॥

રઞ્જિતેનાભ્રપત્રેણ મણીશ્ચૈવ  પ્રકારયેત્ ।
ઉપાશ્રયમથાપ્યેષં શુલ્બવઙ્ગેન કારયેત્ ॥  ૨૧૫॥

વિવિધા મુકુટા દિવા પૂર્વં યે ગદિતા મયા ।
તેઽભ્રપત્રોજ્વલાઃ કાર્યા મણીવ્યાલોપશોભિતાઃ ॥  ૨૧૬॥

ન શાસ્ત્રપ્રભવં કર્મ તેષાં હિ સમુદાહૃતમ્ ।
આચાર્યબુદ્ધ્યા કર્તવ્યમૂહાપોહપ્રયોજિતમ્ ॥  ૨૧૭॥

એષ મર્ત્યક્રિયાયોગો ભવિષ્યત્કલ્પિતો મયા ।
કસ્માદલ્પબલત્વં હિ મનુષ્યેષુ ભવિષ્યતિ ॥  ૨૧૮॥

મર્ત્યાનામપિ નો શક્યા વિભાવાઃ સર્વકાઞ્ચનાઃ ।
નેષ્ટાઃ સુવર્ણરત્નૈસ્તુ મુકુટા ભૂષણાનિ વા ॥  ૨૧૯॥

યુદ્ધે નિયુદ્ધે નૃત્તે વા વૃષ્ટિવ્યાપારકર્મણિ ।
ગુરુભાવાવસન્નસ્ય સ્વેદો મૂર્છા ચ જાયતે ॥  ૨૨૦॥

સ્વેદમૂર્છાક્લમાર્તસ્ય પ્રયોગસ્તુ વિનશ્યતિ ।
પ્રાણાત્યયઃ કદાચિચ્ચ ભવેદ્વ્યાયતચેષ્ટયા ॥  ૨૨૧॥

તસ્માત્તામ્રમયૈઃ પત્રૈરભ્રકૈ રઞ્જિતૈરપિ ।
ભેણ્ડૈરપિ મધૂચ્છિષ્ટૈઃ કાર્યાણ્યાભરણાનિ તુ ॥  ૨૨૨॥

એવં લોકોપચારેણ સ્વબુદ્ધિવિભવેન ચ ।
નાટ્યોપકરણાનીહ બુધઃ સમ્યક્ પ્રયોજયેત્ ॥  ૨૨૩॥

ન ભેદ્યં નૈવ ચ ચ્છેદ્યં ન પ્રહર્તવ્યમેવ ચ ।
રઙ્ગે પ્રહરણૈઃ કાર્યં સંજ્ઞામાત્રં તુ કારયેત્ ॥૨૨૪॥

અથવા યોગશિક્ષાભિર્વિદ્યામાયાકૃતેન વા  ।
શસ્ત્રમોક્ષઃ પ્રકર્તવ્યો રઙ્ગમધ્યે પ્રયોક્તૃભિઃ ॥  ૨૨૫॥

એવં નાનાપ્રકારૈસ્તુ આયુધાભરણાનિ ચ ।
નોક્તાનિ યાનિ ચ મયા લોકાદ્ ગ્રાહ્યાણિ તાન્યપિ ॥  ૨૨૬॥

આહાર્યાભિનયો હ્યેષ મયા પ્રોક્તઃ સમાસતઃ ।
અત ઊર્ધ્વં પ્રવક્ષ્યામિ સામાન્યાભિનયં પ્રતિ ॥  ૨૨૭॥

ઇતિ ભારતીયે નાટ્યશાસ્ત્રે આહાર્યાભિનયો નામૈકવિંશોઽધ્યાયઃ ।

Encoded by Padmaker Dadegaonkar dadegaonkar@yahoo.com

*Natya Shastra Chapter 21*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*